## खरि च। (५५/१२१)

खरि च परतो झलां [1]चरादेशो भवति। [2]जश्ग्रहणं नानुवर्तते, पूर्वसूत्रे चानुकृष्टत्वात्। भेत्ता। भेत्तुम्। भेत्तव्यम्। [3]युयुत्सते। आरिप्सते। आलिप्सते॥

## वाऽवसाने। (५६/२०६)

[4]झलां [5]चर् इति वर्तते। अवसाने [6]वर्तमानानां झलां [7]वा चरादेशो भवति। वाक्, वाग्। त्वक्, त्वग्। श्वलिट्, श्वलिड्। त्रिष्टुप्, त्रिष्टुब्॥

## अणोऽप्रगृह्यस्यानुनासिकः। (५७/११०)

[8]अणः अप्रगृह्यसञ्ज्ञस्य अवसाने [9]वर्तमानस्य वा अनुनासिकादेशो भवति। दधिँ, दधि। मधुँ, मधु। कुमारीँ, कुमारी। अणः इति किम्? कर्तृ। हर्तृ। अप्रगृह्यस्य इति किम्? अग्नी। वायू॥

## अनुस्वारस्य ययि परसवर्णः। (५८/१२४)

अनुस्वारस्य ययि परतः परसवर्णः आदेशो भवति। शङ्किता। शङ्कितुम्। शङ्कितव्यम्। उञ्छिता। उञ्छितुम्। उञ्छितव्यम्। कुण्डिता। कुण्डितुम्। कुण्डितव्यम्। नन्दिता। नन्दितुम्। नन्दितव्यम्। कम्पिता। कम्पितुम्। कम्पितव्यम्। इह कुर्वन्ति, [10]वृषन्ति [11]इत्यत्र णत्वस्य असिद्धत्वात् पूर्वं नकारस्य अनुस्वारः क्रियते। तस्यापि परसवर्णेन पुनर्नकार एव भवति। तस्यापि असिद्धत्वात् पुनर्णत्वं न भवति। एवमनुस्वारीभूतो णत्वमतिक्रामति [12]इति। ययि इति किम्? आक्रंस्यते। आचिक्रंस्यते॥

## वा पदान्तस्य। (५९/१२५)

[13]पदान्तस्य अनुस्वारस्य ययि परतः वा [14]परसवर्णादेशो भवति। तङ्कथञ्चित्रपक्षण्डयमानन्नभःस्थम्पुरुषोऽवधीत्, तं कथं चित्रपक्षं डयमानं नभःस्थं पुरुषोऽवधीत्॥

## तोर्लि। (६०/११७)

[15]तवर्गस्य लकारे परतः परसवर्णादेशो भवति। अग्निचिल्लुनाति। सोमसुल्लुनाति। [16]भवाँल्लुनाति। [17]महाँल्लुनाति॥

---

1. चरः भवन्ति ब. 2. झल्ग्रहणं ह. मुद्रितः पाठः. 3. युयुत्सते नास्ति क. 4. वाक्यमिदं नास्ति ब. 5. चरः भवन्ति क, चरादेशाः भवन्ति इ. 6. वर्तमानानां नास्ति ब. 7. स्थाने इत्यधिकम् क. 8. वाऽवसाने इति वर्तते इत्यधिकम् इ, वाऽवसाने इत्येव इत्यधिकम् ह, अणन्तस्य क. 9. वर्तमानस्य नास्ति क. 10. कृषन्ति ब. 11. अत्र नास्ति क. 12. इति नास्ति क. 13. अनुस्वारस्य ययि परसवर्णः इत्येव इत्यधिकम् ह. क, नास्ति इ. 14. परसवर्णो क. इ. 15. परसवर्णः इति वर्तते इत्यधिकम् क. इ, परसवर्णः इत्येव इत्यधिकम् ह. 16. उदाहरणमिदं नास्ति क. इ. 17. उदाहरणमिदं नास्ति ह.